तद्दंशनप्रतीकारविधिर्यथा,—
"फणिनां विषवेगे तु प्रथमे शोणितं हरेत् ।
द्वितीये मधुसर्पिर्भ्यां पाययेतागदं भिषक् ॥
नस्यकर्म्माञ्जने युञ्ज्यात्तृतीये विषनाशने ।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ दापयेत् ॥
शीतोपचारं कृत्वादौ भिषक् पञ्चमषष्ठयोः ।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम्॥
सप्तमे त्ववपीडेन शिरस्तीक्ष्णेन शोधयेत् ।
तीक्ष्णमेवाञ्जनं दद्यात्तीक्ष्णशस्त्रेण मूर्द्ध्नि च ॥
कुर्य्यात् काकपदं चर्म्म मांसम्वा पिशितं क्षिपेत्॥"
इति च सुश्रुते कल्पस्थाने पञ्चमेऽध्याये ॥)
सर्पिणीनामकौषधिः । इति राजनिर्घण्टः ॥
( केतुः । यथा, ग्रहभावप्रकाशे ।
"कपिरत्यन्तधवलः फणी छायः शशिस्तथा ।"
सीसकं चास्य विषयो यथा,—
"रसो गन्धटङ्कणः सीसकोऽयं
फणी पिप्पलीत्येव धुस्तूरपिष्टः
जयेत् सन्निपातं द्विगुञ्जाकप्रमाणं
भवेदर्कमूलाम्बु सव्योषपूर्व्वम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे पञ्चवक्त्ररसे ॥ मरुवकनामौषधं यथा,—
"मारुतोऽसौ मरुवको मरुन्मरुरपि स्मृतः ।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)

फणीश्वरः, पुं, ( फणिनामीश्वरः । ) अनन्तः । इति शब्दरत्नावली ॥

फण्डः, पुं, ( फणति । फण गतौ + "ञमन्तात् डः ।" उणा० १ । ११२ । इति डः ।) जठरम् । इत्युणादिकोषः ॥

फत्कारी, पुं, (फत् इत्यव्यक्तशब्दं करोतीति । कृ + णिनिः । ) पक्षिमात्रम् । इति शब्दचन्द्रिका ॥

फरं, क्ली, (फलतीति । फल् + अच् । लस्य रत्वम् ।) फलकम् । इत्यमरटीकायां भरतः ॥

फरुवकं, क्ली, पूगपात्रम् । इति हारावली ।१३७॥

फर्फरीकः, पुं, (स्फुरतीति । स्फुर स्फुरणे + "फर्फरीकादयश्च ।" उणा० ४ । २० । इति ईकन् धातोः फर्फरादेशश्च । ) चपेटः । मार्द्दवे, क्ली । इति मेदिनी । के, २०० ॥

फर्फरीका, स्त्री, ( फर्फरीक + टाप् । ) पादुका । ( स्फुरतीति ईकन् । टाप् । मतान्तरे स्फुरणादेव तथात्वम् । ) मदनः । इति संक्षिप्तसारोणादिवृत्तिः ॥

फल, निष्पत्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् । )
"इह नवशुककोमला मणीनां
रविकरसम्वलिताः फलन्ति भासः ॥"
इति भारविः ॥
निष्पादनेऽपि वाल्मीकिः ।
"फलति स्म यस्य चरितश्लोकाय दिव्या गिरः ॥"
इति दुर्गादासः ॥

फल, ञ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ञ, फालः फलः । इति दुर्गादासः ॥

फल, ञि त्रा भिदि । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) ञि, फुल्लोऽस्ति । त्रा, फलितं फुल्लं तेन । फलति काष्ठं कुठारः । इति दुर्गादासः ॥

फलं, क्ली, ( फलतीति । फल निष्पत्तौ ञि फला विशरणे वा + अच् । ) लाभः । ( यथा, शकुन्तलायाम् । १ अङ्के ।
"शान्तमिदमाश्रमपदं स्फुरति च बाहुः
कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र ॥")
शस्यम् । (यथास्य भक्षणविधिः ।
"फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्दक्षिणेषु च ।"
"फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥"
इति सुश्रुते सूत्रस्थाने । ४६ अध्यायः ॥
यथा च शकुन्तलायाम् ।
"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ॥")
फलकम् । ( शारिफलकार्थे यथा, महाभारते । ४ । १ । २४ ।
"वैदूर्य्यान् काञ्चनान् दान्तान् फलैर्ज्योतीरसैः सह ।
कृष्णाक्षान् लोहिताक्षांश्च निर्व्वर्त्स्यामि मनोरमान् ॥" )
हेतुकृतम् । इत्यमरः ॥ जातीफलम् । शुक्तिः । त्रिफला । ( यथा,—
"हरीतकी चामलकी विभीतकमिदं त्रयम् ।
त्रिफला फलमित्युक्तं तच्च ज्ञेयं फलत्रिकम् ॥"
इति वैद्यकपरिभाषायाम् ॥)
कक्कोलम् । इति मेदिनी । ले, ११ ॥ बाणाग्रम् । आर्त्तवम् । इति शब्दरत्नावली ॥ फालः । इति हेमचन्द्रः ॥ दानम् । इति धरणिः ॥ मुष्कः । यथा,—
"अफलो भुज्यते मेषः सफलस्तु न भुज्यते ।"
इति रामायणम् ॥
( प्रमेयभेदः । यथा,—
"आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥" इति गौतमसूत्रम् ।
तत्रैव फललक्षणम् यथा । "प्रवृत्तिदोषजनितोऽर्थः फलम् ॥" "सुखदुःखसंवेदनं फलम् । सुखविपाकं कर्म्मदुःखविपाकञ्च तत् पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम् । तथाहि प्रवृत्तिदोषजनितोऽर्थः फलमेतत् सर्व्वं भवति तदेतत् फलमुपात्तमुपात्तं हेयं त्यक्तं त्यक्तमुपादेयमिति नास्य हानोपादानयोर्निष्ठा पर्य्यवसानं वास्ति स खल्वयं हानोपादानस्रोतसोह्यते लोकः ।" इति वात्स्यायनः ॥ ) जीवस्य कर्म्मफलभुक्तिर्यथा,—
"जीवः कर्म्मफलं भुङ्क्ते आत्मा निर्लिप्त एव च ।
आत्मनः प्रतिविम्बश्च देही जीवः स एव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
दानफलं यथा,—
"यथा फलन्ति शस्यानि न्यूनानि चाधिकानि च ।
कर्षकाणां क्षेत्रभेदे पात्रभेदे फलं तथा ॥
सामान्यदिवसे विप्रे दानं समफलं भवेत् ।
अमायां रविसंक्रान्त्यां फलं शतगुणं भवेत् ।
चातुर्मास्यां पौर्णमास्यामनन्तं फलमेव च ।
ग्रहणे शशिनः कोटिगुणञ्च फलमेव च ।
सूर्य्यस्य ग्रहणे चापि ततो दशगुणं भवेत् ॥
अक्षयायामक्षयञ्चैवासंख्यं फलमुच्यते ।
एवमन्यत्र पुण्याहे फलाधिक्यं भवेदिह ॥
यथा दाने तथा स्नाने जपेऽन्यत्पुण्यकर्म्मसु ।
एवं सर्व्वत्र बोद्धव्यं नराणां कर्म्मणां फलम् ॥
सामान्यदेशे दानञ्च विप्रे समफलं भवेत् ।
तीर्थे देवगृहे चैव फलं शतगुणं स्मृतम् ॥
गङ्गायाञ्च कोटिगुणं क्षेत्रे नारायणे फलम् ।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च ॥
यथा चैव कोटिगुणं तथा च विष्णुमन्दिरे ।
केदारे च लक्षगुणं हरिद्वारे तथा फलम् ॥
पुष्करे भास्करक्षेत्रे दशलक्षगुणं फलम् ।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च ॥
सामान्यब्राह्मणे दानं समभेः फलं भवेत् ।
लक्षं त्रिसन्ध्यपूते च पण्डिते च जितेन्द्रिये ॥
विष्णुमन्त्रोपासके च बुधे कोटिगुणं भवेत् ।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं गुणं भवेत् ॥
यथा दण्डेन सूत्रेण शरावेण जलेन च ।
कुम्भं निर्म्माति चक्रेण कुम्भकारो मृदा भुवि ।
तथैव कर्म्मसूत्रेण फलं धाता ददाति च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३४ अध्यायः ॥*॥
स्वप्रियफलस्य विष्णुदेयत्वं यथा,—
"भक्ष्याणि यानि पेयानि भोज्यान्यभिमतानि
च ।
फलञ्च वल्लभं यच्च तत्तद्देयं जनार्द्दने ॥"
इत्यग्निपुराणम् ॥ * ॥
इष्टकफलदारा फलपातननिषेधो यथा,—
"न पातयेदिष्टकाभिः फलानि वै फलेन तु ।
न म्लेच्छभाषां शिक्षेत नाकर्षेच्च पदासनम् ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
कर्म्मजन्यशुभादृष्टदुरदृष्टसम्भवस्वर्गनरकादि । तत्त्रिविधं यथा,—
"अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥
"अनिष्टं नारकित्वम् । इष्टं देवत्वम् । मिश्रं मनुष्यत्वम् । एवं त्रिविधं पापस्य पुण्यस्य उभयमिश्रस्य च कर्म्मणो यत् फलं प्रसिद्धं तत् सर्व्वमत्यागिनामेव प्रेत्य परत्र भवति तेषां त्रिविधकर्म्मसम्भवात् न तु सन्न्यासिनां क्वचिदपि भवति ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥
वेदादीनां फलम् । यथा, वह्निं प्रति मरीचिवाक्यम् ।
"स तं प्राह फलं ब्रूहि वेदस्य च धनस्य च ।
दारश्रुतस्य विप्रादेः स्वर्गापवर्गहेतवे ॥"